# नेति

नेतिविधिविषये उच्यते यत् वितस्तिपर्यन्तं दीर्घम् अतीवस्निग्धं सूत्रं नासानाले प्रवेशयेत् तथा तं सूत्रं मुखात् निर्गमयेत्। एषा एव क्रिया नेतिक्रिया इति सिद्धपुरुषैः निगद्यते। घेरण्डसंहितायामपि उपर्युक्तं मतमेव समर्थितमस्ति।

(क) सूत्रनेति — अस्मिन् नेतिकर्मणि प्रयुज्यमानं सूत्रं नवसूत्रात्मकं, दशसूत्रात्मकं, पञ्चदशसूत्रात्मकं वा भूयात्। तस्य मुखं सिक्थद्रव्येण सिक्तं भवेत्। सम्प्रति सूत्रस्थाने आपणं समुपलभ्यमानायाः रबड़-इत्यनेन निर्मितक्षीणनलिकायाः (catheter) प्रयोगः क्रियते।

सूत्रमिदं नासिकाप्रवेशनात् प्रागेव जलेन सिक्तं भवेत्। तदनन्तरं येन नासापुटेन श्वासः चलन् अस्ति तेनैव नासापुटेन तं सूत्रं प्रवेशयेत्। यदि प्रवेशने असौविध्यमनुभूयते तर्हि तेनैव नासापुटेन बलेन वारं वारं पूरकं कर्त्तव्यम् येन तत् सूत्रं मुखे आगच्छति। तदनन्तरं सूत्रस्य अग्रद्वयं धृत्वा हस्तद्वयेन तत् सूत्रं वारमेकं वारद्वयं वा अग्रभागे पृष्ठभागे च नेतव्यम्। परन्तु केषाञ्चन मतेन तु कार्यमिदं त्रिंशत्वारतः पञ्चाशत्वारपर्यन्तं कर्त्तव्यमिति। अनेनैव रूपेण अपरेण नासापुटेन अपि कर्त्तव्यम्। क्रियाएषा घर्षणनेति अपि उच्यते।

Scanned with CamScanner

(ख) जलनेति –

प्रथमतया जलनेति कर्त्तव्य इति केषाञ्चन मतम् । केषाञ्चनमतेन तु सूत्रनेतिक्रियया नासिकायां स्थितानां मलानां शुद्धिकरणानन्तरं तान् प्रक्षाल्य बहिर्निष्कासनं जलनेति करोति। अतः जलनेति सूत्रनेतिक्रियाया अनन्तरं कर्त्तव्यः यत् खलु युक्तियुक्तं प्रतिभाति।

जलनेतिक्रियायाः विधिविषये प्राप्यते यत् प्रातः काले दन्तधावनानन्तरं येन नासापुटेन श्वासः चलति तद्पार्श्वस्थेन हस्तेन जलं गृहीत्वा अपरं नासापुटमवरुद्ध्य जलाकर्षणं कर्त्तव्यम् । जलं कमण्डलुसदृशमुखयुक्तपात्रेण गृहीतव्यम् । तज्जलं ग्रीष्मकाले प्रत्यग्रं भवेत् तथा शीतकाले किञ्चिदुष्णं भवेत् । प्रथमावस्थायां जलं मुखे आगच्छति तथा मस्तिष्के किञ्चित् असौविध्यमनुभूयते परन्तु अभ्यासाधिक्यात् तत् सर्वं समाप्तं भवति। कालेऽस्मिन् श्वासः प्रश्वासः मुखेनैव कर्त्तव्यः । तदनन्तरमाकृष्टं तज्जलम् अपरनासापुटेन स्वयमेव बहिर्गच्छति। केचन तु एषा क्रिया नासापुटेन नासापुटाभ्यां वा जलं गृहीत्वा गृहीतं तज्जलं मुखेन निष्कास्य अपि कर्त्तुं शक्यते इति स्वाभिप्रायं प्रकटयन्ति।

(ग) कपालनेति –

मुखेन जलं गृहीत्वा गृहीतं तज्जलं नासिकाद्वयेन बहिः निष्कासनमेव कपालनेति इत्युच्यते ।

Scanned with CamScanner

(घ) अन्यनेति — (तैलनेति, घृतनेति, शिवाम्बुनेतिश्चेति) - एतेषां प्रक्रिया अतीवसरला। ड्रापर-इत्यस्य सहायतया उपर्युक्तानां द्रव्याणां कतिपयबिन्दूनां नासा-पुटे पातनमेव तैलनेतिः, घृतनेतिः, शिवाम्बुनेतिश्चेति उच्यते। क्रियेयं प्रातःकाले जलनेतिक्रियाया अनन्तरमथवा शयनसमये कर्त्तव्या। परन्तु एतासां क्रियाणां अभ्यासः योग्यगुरोः सान्निध्ये एव कर्त्तव्यः।

इति

Scanned with CamScanner